श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

॥ श्री कृष्णमङ्गळम् ॥

This document has been prepared by

Sunder Kidāmbi

with the blessings of

श्री रङ्गरामानुज महादेशिकन्

His Holiness śrīmad āṇḍavan śrīraṅgam

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

॥ श्री कृष्णमङ्गळम् ॥

मङ्गलं यादवेन्द्राय महनीयगुणाब्धये।
वसुदेवतनूजाय वासुदेवाय मङ्गलम् ॥ 1 ॥

किरीटकुण्डलभ्राजदलकैर्यन्मुखश्रिये।
श्रीवत्सकौस्तुभोद्भासि वक्षसे चास्तु मङ्गलम् ॥ 2 ॥

नीलाम्बुदनिकाशाय विद्युत्सदृशवाससे।
देवकीवसुदेवाभ्यां संस्तुतायास्तु मङ्गलम् ॥ 3 ॥

ताभ्यां संप्रार्थितायाथ प्राकृतार्भकरूपिणे।
यशोदाय गृहं पित्रा प्रापितायास्तु मङ्गलम् ॥ 4 ॥

पूतनाऽसुपयःपानपेशलायाऽसुरारिणे।
शकटासुरविध्वंसि पादपद्माय मङ्गलम् ॥ 5 ॥

यशोदालोकिते स्वास्ये विश्वरूपप्रदर्शिने।
मायामानुषरूपाय माधवायास्तु मङ्गलम् ॥ 6 ॥

तृणावर्तदनूजासु हारिणे शुभकारिणे।
वत्सासुरप्रभेत्रे च वत्सपालाय मङ्गलम् ॥ 7 ॥

दामोदराय वीराय यमळार्जुनपातिने।
धात्राहृतानां वत्सानां रूपधर्त्रेऽस्तु मङ्गलम् ॥ 8 ॥

ब्रह्मस्तुताय कृष्णाय कालीयफणनृत्यते।
दावाग्निरक्षिताशेष गोगोपालाय मङ्गलम् ॥ 9 ॥

गोवर्धनाचलोद्धर्त्रे गोपीक्रीडाभिलाषिणे।
अञ्जल्याऽऽहृतवस्त्राणां सुप्रीतायास्तु मङ्गलम्॥ 10॥

सुदर्शनाख्यगन्धर्व शापमोक्षणकारिणे।
शङ्खचूडशिरोहर्त्रे वृषभघ्नाय मङ्गलम्॥ 11॥

गान्दिनीसुतसन्दृष्ट दिव्यरूपाय शौरिणे।
त्रिवक्रया प्रार्थिताय सुन्दराङ्गाय मङ्गलम्॥ 12॥

गन्धमाल्याम्बराढ्याय गजराजविमर्दिने।
चाणूरमुष्टिकप्राणहारिणे चास्तु मङ्गलम्॥ 13॥

कंसहन्त्रे जरासन्धबलमर्दन कारिणे।
मधुरापुरवासाय महाधीराय मङ्गलम्॥ 14॥

मुचुकुन्दमहानन्ददायिने परमात्मने।
रुक्मिणीपरिणेत्रे च सबलायास्तु मङ्गलम्॥ 15॥

द्वारकापुरवासाय हारनूपुरधारिणे।
सत्यभामासमेताय नरकघ्नाय मङ्गलम्॥ 16॥

बाणासुरकरच्छेत्रे भूतनाथस्तुताय च।
धर्माहूताय यागार्थं शर्मदायास्तु मङ्गलम्॥ 17॥

कारयित्रे जरासन्धवधं भीमेन राजभिः।
मुक्तैस्स्तुताय तत्पुत्रराज्यदायास्तु मङ्गलम्॥ 18॥

चैद्य तेजोपहर्त्रे च पाण्डवप्रियकारिणे।
कुचेलाय महाभाग्यदायिने तेऽस्तु मङ्गलम्॥ 19॥

देव्यष्टकसमेताय पुत्रपौत्रयुताय च।
षोडशस्त्री सहस्रैस्तु संयुतायास्तु मङ्गलम्॥ 20॥

यश्शिष्टरक्षणपरः करुणांबुराशिः
दुष्टासुरांशनृपतीन् विनिगृह्य शूरान्।
कष्टां दशां अपनुदन्तरसा पृथिव्याः
पुष्टिं ददातु स हरिः कुलदैवतं नः॥ **21** ॥

॥ श्री कृष्णमङ्गळं समाप्तम्॥